10819

10819 श्री हरिदास-संस्कृत-ग्रन्थमाला ४७

श्रीमदन्नम्भट्टविरचितः

# तर्कसंग्रहः

परीक्षोपयुक्तलक्षण-टिप्पणीसहितः

सम्पादकः

पं० राजनारायणशास्त्री न्यायाचार्यः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : सप्तम, वि० सं० २०१८
मूल्यं : ०-२५

©
Chowkhamba Sanskrit Series Office,
P. O. Box 8, Varanasi.
1961

Phone 3145

॥ श्रीः ॥

# तर्कसंग्रहः

## परीक्षोपयुक्तलक्षणटिप्पणीसहितः

[1]निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥

---

नमस्कृत्य शिवं साम्बं गुरुपादानुकम्पया ।
राजनारायणः शुक्लस्तर्कसंग्रहटिप्पणीम् ॥ १ ॥
तन्वे यथाधिसंक्षिप्तां छात्राणां हितकाम्यया ।
परीक्षापाशबद्धानां नालघुं सारवत्तराम् ॥ २ ॥

१. निधायेति–निधाय हृदि विश्वेशमित्यत्र निपूर्वकधाधातोर्ध्यानमर्थः, ल्यप् उत्तरकालिकत्वमर्थः, हृत्पदम्मनःपरम् 'स्वान्तं हृन्मानसं मनः' इति कोशात । अधिकरणत्वं सप्तम्यर्थः, विश्वस्य ईश इत्यत्र षष्ठ्या निरूपितत्वमर्थः, ईशशब्दस्य नियामकतावानर्थः ।,निरूपितत्वस्य स्वरूपसम्बन्धेन नियामकतायामन्वयः । ईशमित्यत्र द्विती-

यार्थ॰कर्मत्वं विषयतारूपम् , सविषयार्थबोधकधातुसमभिव्याहृतद्वितीयार्थीभूतकर्मत्वं विषयतारूपमिति न्यायात् । धात्वर्थध्याने निरूपकत्वसम्बन्धेन हृच्छब्दोत्तरवर्तिसप्तम्यर्थीभूताधिकरणत्वस्यान्वयः । एवञ्च हृदधिकरणकविश्वनिरूपितकारणताविषयकध्यानोत्तरकालिकीतिफलितम् ।

विधाय गुरुवन्दनमित्यत्र विपूर्वकधाधातोर्विधानमर्थः, ल्यप् उत्तरकालिकत्वम् । गुरूणां वन्दनमित्यत्र षष्ठ्याः कर्मत्वम् , द्वितीयाया विषयत्वम् , तस्य धाधात्वर्थीभूतकृतौ निरूपकत्वसम्बन्धेनान्वयः ।

एवञ्च गुरूद्देश्यकवन्दनविषयककृत्युत्तरकालिकीति । बालानामित्यत्र षष्ठ्यास्समवेतत्वमर्थः । सुखबोधोऽनायासपूर्वकपदार्थतत्त्वज्ञानम् । चतुर्थ्याः प्रयोजकत्वम् । एवञ्च बालसमवेतानायासपूर्वकबोधफलकेति । क्रियत इत्यत्र मयेत्यध्याहार्यम् , समवेतत्वन्तृतीयार्थः, कृधातोः कृतिरर्थः, आख्यातस्य वर्त्तमानकालिकत्वम् विषयत्वञ्चार्थः, समवेतत्वस्य च कृतावन्वयः, कृतेर्निरूपितत्वसम्बन्धेन विषयतायाम्, विषयतायाश्च स्वरूपसम्बन्धेन तर्कसंग्रहेऽन्वयः, एवञ्चायमन्वयबोधः–हृदधिकरणकविश्वनिरूपितकारणताविषयकध्यानोत्तरकालिकी गुरूद्देश्यकवन्दनविषयककृत्युत्तरकालिकी बालसमवेतानायासपूर्वकपदार्थतत्त्वज्ञानफलिका अन्नम्भट्टसमवेता वर्त्तमानकालिकी या कृतिः तादृशकृतिविषयः तर्कसंग्रहः ।



[1]पदार्थाः कति कानि च तेषां नामानि ?

**द्रव्य[2]–गुण[3]–कर्म[4]–सामान्य[5]–विशेष[6]–समवाया[7]ऽभावाः[8] सप्त पदार्थाः ।**

द्रव्याणि कति, कानि च तानि ?

**तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।**

---

१. पदार्थत्वञ्च-पदजन्यप्रतीतिविषयत्वम् । अभिधेयत्वम्प्रमेयत्वम्पदशक्यत्वं वाच्यत्वादि वा पदार्थसामान्यलक्षणम् । २. समवायसम्बन्धेन गुणक्रियावत्त्वं द्रव्यसामान्यलक्षणम् । द्रव्यत्वजातिमत्त्वं वा । ३. समवायेन गुणत्वजातिमत्त्वं गुणसामान्यलक्षणम् । ४. कर्मत्वजातिमत्त्वं कर्मसामान्यलक्षणम् । ५. नित्यत्वे सति संयोगभिन्नत्वे सति बहुसमवेतत्वं जातिसाधारणलक्षणम् । ६. स्वतो व्यावर्त्तकत्वं विशेषसामान्यलक्षणम् । निस्सामान्यत्वे सति जातिभिन्नत्वे सति समवेतत्वं वा । ७. सम्बन्धप्रतियोग्यनुयोगिभिन्नत्वे सति नित्यत्वे सति विशिष्टबुद्धिनियामकत्वं ( सम्बन्धत्वं ) समवायस्य लक्षणम् । ८. नञ्पदजन्यप्रतीतिविषयत्वं भावभिन्नत्वं वा अभावसामान्यलक्षणम् । वस्तुतस्तु–अभावत्वमखण्डोपाधि ।

कति गुणाः, के च ते ?

रूप–रस–गन्ध–स्पर्श–संख्या–परिमाण–पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न–धर्मा-ऽधर्म--संस्काराश्चतुर्विंशतिर्गुणाः ।

कियन्ति कर्माणि कानि च तानि ?

उत्क्षेपणा–पक्षेपणा–कुञ्चन-प्रसारण-गमनानि पञ्च कर्माणि ।

सामान्यं कतिविधम् ?

परमपरं चेति द्विविधं सामान्यम् ।

कियन्तो विशेषाः ?

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।

समवायः कतिविधः ?

समवायस्त्वेक एव ।

अभावः कतिविधः ?

अभावश्चतुर्विधः—प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।



पृथिव्याः किं लक्षणं, कति च भेदाः ?

तत्र गन्धवती पृथिवी[1] । सा द्विविधा-नित्या[2]ऽनित्या[3] च । नित्या-परमाणुरूपा । अनित्या कार्यरूपा । पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् । [4]शरीरमस्मदादीनाम् । [5]इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति । विषयो[6] मृत्पाषाणादिः ।

जलस्य किं लक्षणं, कति च भेदाः ?

[7]शीतस्पर्शवत्य आपः । ता द्विविधाः-नित्या अनित्याश्च । नित्याः परमाणुरूपाः । अनित्याः [8]कार्य-

---

१. समवायसम्बन्धेन गन्धवत्त्वम् पृथिवीलक्षणम् । अथवा–गन्धसमानाधिकरणद्रव्यत्वव्याप्य ( पृथिवीत्व ) जातिमत्त्वम् । २. ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वम् नित्यत्वम् । ३. ध्वंसप्रतियोगित्वम्, प्रागभावप्रतियोगित्वं वाऽनित्यत्वम् । ४. अन्त्यावयवित्वे सति चेष्टाश्रयत्वं शरीरस्य लक्षणम् । ५. शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वम् इन्द्रियसामान्यलक्षणम् । ६. शरीरेन्द्रियभिन्नत्वे सति उपभोगसाधनत्वम् विषयत्वम् । ७. समवायसम्बन्धेन शीतस्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं वा जलसामान्यलक्षणम् । ८. सावयवत्वम् अनित्यत्वं, प्रागभावप्रतियोगित्वं वा कार्यस्य लक्षणम् ।

रूपः । पुनस्त्रिविधाः—शरीरेन्द्रियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः सरित्समुद्रादिः ।

तेजसः किं [1]लक्षणं, कति च भेदाः ?

[2]उष्णस्पर्शवत्तेजः । तच्च द्विविधं—नित्यमनित्यं च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधं—शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके प्रसिद्धम् । इन्द्रियं रूपग्राहकं[3] चक्षुः कृष्णताराग्रवर्ति । विषयश्चतुर्विधो—भौमदिव्योदर्याकरजभेदात् । भौमं वह्न्यादिकम् । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरुदर्यम् । आकरजं सुवर्णादि ।

---

१. लक्षणत्वञ्च—असाधारणधर्मत्वम् । केवलान्वयिभिन्नत्वे सति अव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रयशून्यत्वे सति लक्ष्यतावच्छेदकसमनियतत्वं वा । २. समवायसम्बन्धेन उष्णस्पर्शवत्त्वम्, उष्णस्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम् वा । ३. ग्राहकत्वञ्च—प्रत्यक्षजनकत्वम् ।



वायोः किं लक्षणं, कति च भेदाः ?

[1]रूपरहितस्पर्शवान् वायुः[2] । स द्विविधः-नित्योऽनित्यश्च । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः । पुनस्त्रिविधः—शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुः । शरीरान्तःसञ्चारी वायुः प्राणः[3] । स चैकोऽप्युपाधिभेदात् [4]प्राणापानादिसंज्ञां लभते ।

आकाशस्य किं लक्षणं, कतिविधं च तत् ?

शब्दगुणकमाकाशम्[5] । तच्चैकं [6]विभु नित्यं च ।

कालस्य किं लक्षणं, कति च भेदाः ?

अतीतादिव्यवहारहेतुः कालः[7] । स चैको विभुर्नित्यश्च ।

---

१. सामानाधिकरण्यसम्बन्धेन रूपत्वावच्छिन्नप्रतियोगिताकाभाववविशिष्टस्पर्शवत्त्वं वायुसामान्यलक्षणम् । २. स्पर्शवत्त्वं-स्पर्शसमानाधिकरणद्रव्यविभाजकजातिमत्त्वम् । ३. शरीरान्तःसञ्चारित्वे सति वायुत्वम्प्राणवायोर्लक्षणम् । ४. हृदि प्राणो गुदेऽपानस्समानो नाभिदेशगः । उदानः कण्ठदेशस्थो व्यानस्सर्वशरीरगः ॥ ५. समवायसम्बन्धेन शब्दवत्त्वमाकाशस्य लक्षणम् । ६. सर्वक्रियावद्द्रव्यसंयोगित्वं विभुत्वम् । ७. अतीतानागतवर्तमानव्यवहारासाधारणकारणत्वं कालस्य लक्षणम् ।

दिशः किं लक्षणं, कतिविधा च सा ?

प्राच्यादिव्यवहारहेतुर्दिक्[1]। सा चैका नित्या विभ्वी च।

आत्मनः किं लक्षणं, कतिविधश्च सः ?

ज्ञानाधिकरणमात्मा[2]। स द्विविधः—जीवात्मा परमात्मा चेति। तत्रेश्वरः सर्वज्ञः[3]। परमात्मा[4] एक एव, जीवस्तु[5] प्रतिशरीरं भिन्नो विभुर्नित्यश्च।

---

१. प्राचीप्रतीच्युदीच्यवाच्यादिव्यवहारासाधारणकारणत्वं दिक्सामान्यलक्षणम्। २. समवायसम्बन्धेन ज्ञानाश्रयत्वम् आत्मसामान्यलक्षणम्। समवायसम्बन्धावच्छिन्नज्ञाननिष्ठाऽऽधेयतानिरूपिताधिकरणतावत्त्वं वा। ३. सर्वज्ञत्वञ्च—यत्किञ्चिद्धर्मावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावद्विषयितात्वव्यापकज्ञानाश्रयत्वम्। व्यापकता च स्वीयविषयितानिरूपकतावच्छेदकधर्मावच्छिन्ननिरूपकतानिरूपितनिरूप्यतावत्त्वसम्बन्धेन। ४. समवायसम्बन्धेन नित्यज्ञानाधिकरणत्वं परमात्मत्वम्। ५. अनेकत्वे सति विभुत्वे सति नित्यत्वे सति समवायेन ज्ञानाधिकरणत्वं जीवात्मनो लक्षणम्।



मनसः किं लक्षणं, कतिविधं च तत् ?

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः[1]। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।

रूपस्य किं लक्षणं, कतिविधं च तत् ?

चक्षुर्मात्रग्राह्यो गुणो रूपम्[2]। तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम्। पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले भास्वरशुक्लं तेजसि।

रसस्य किं लक्षणं, कतिविधश्च सः ?

रसनाग्राह्यो गुणो रसः[3]। स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां षड्विधः। जले मधुर एव।

---

१. सुखदुःखादिसाक्षात्कारकारणत्वे सति इन्द्रियत्वम्, स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणम्। २. चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वविशिष्टविशेषगुणत्वं रूपसामान्यलक्षणम्। चक्षुर्ग्राह्यजातिमद्गुणत्वं वा। ३. रसनेन्द्रियजन्यप्रत्यक्षविषयत्वविशिष्टगुणत्वं रसस्य लक्षणम्।

गन्धस्य किं लक्षणं, तद्भेदश्च कः ?

घ्राणग्राह्यो गुणो गन्धः[1]। स द्विविधः—सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः।

स्पर्शस्य किं लक्षणं, के च भेदाः ?

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः[2]। स च त्रिविधः—शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः।

रूपादिचतुष्टयं कुत्र पाकजमपाकजं वा कुत्र ?

[3]रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्रापाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्।

---

१. घ्राणेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं गन्धसामान्यलक्षणम्। २. त्वगिन्द्रियभिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वविशिष्टगुणत्वं स्पर्शस्य लक्षणम्। ३. विजातीयतेजस्संयोगजत्वम् पाकजत्वम्।

 10849

संख्यायाः किं लक्षणम्, कुत्र च सा वर्त्तते ?

एकत्वादिव्यवहारहेतुः संख्या[1]। सा नवद्रव्यवृत्तिः एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यमेव।

परिमाणस्य किं लक्षणं, के च तस्य भेदाः ?

मानव्यवहारासाधारणं कारणं परिमाणम्[2]। नवद्रव्यवृत्ति। तच्चतुर्विधम्—अणु महद्दीर्घं ह्रस्वं चेति।

पृथक्त्वस्य किं लक्षणम् ?

पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम्[3]। सर्वद्रव्यवृत्ति।

संयोगस्य किं लक्षणम् ?

संयुक्तव्यवहारहेतुः संयोगः[4]। सर्वद्रव्यवृत्तिः।

---

१. एकत्वद्वित्वबहुत्वादिव्यवहारासाधारणकारणत्वं संख्यासामान्यलक्षणम्। २. मानव्यवहारासाधारणकारणत्वं परिमाणसामान्यलक्षणम्। ३. पृथग्व्यवहारासाधारणकारणत्वं पृथक्त्वलक्षणम्। ४. संयुक्तव्यवहारासाधारणकारणत्वं संयोगस्य लक्षणम्।

विभागस्य किं लक्षणम् ?

संयोगनाशको गुणो विभागः[१]। सर्वद्रव्यवृत्तिः।

परत्वापरत्वयोः किं लक्षणं, के च भेदाः ?

पराऽपरव्यवहाराऽसाधारणकारणे परत्वापरत्वे[२][३]। पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते च द्विविधे—दिक्कृते, कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्, समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वं, कनिष्ठे कालकृतमपरत्वम्।

गुरुत्वस्य किं लक्षणम् ?

आद्यपतनाऽसमवायिकारणं गुरुत्वम्[४]। पृथिवीजलवृत्ति।

द्रवत्वस्य किं लक्षणम्, के च भेदाः ?

आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वम्[५]। पृथिव्य-

---

१. संयोगनाशकत्वविशिष्टगुणत्वं विभागस्य लक्षणम्। २. परव्यवहारासाधारणकारणत्वम्परत्वम्। ३. अपरव्यवहारासाधारणकारणत्वमपरत्वम्। ४. आद्यपतनासमवायिकारणत्वं गुरुत्वलक्षणम्। ५. आद्यस्यन्दनासमवायिकारणत्वं द्रवत्वलक्षणम्।



प्तेजोवृत्ति। तद् द्विविधं—सांसिद्धिकं, नैमित्तिकं च। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं, तेजसि सुवर्णादौ।

स्नेहस्य किं लक्षणम्, कुत्र च सः ?

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः[१]। जलमात्रवृत्तिः।

शब्दस्य किं लक्षणम्, कुत्र च सः ?

श्रोत्रग्राह्यो गुणः शब्दः[२]। आकाशमात्रवृत्तिः। स द्विविधः—ध्वन्यात्मको, वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।

बुद्धेः किं लक्षणं, कतिविधा च सा ?

सर्वव्यवहारहेतुर्गुणो बुद्धि[३]र्ज्ञानम्। सा द्विविधा—स्मृतिरनुभवश्च।

स्मृतेः किं लक्षणम् ?

संस्कारमात्रजन्यं ज्ञानं स्मृतिः[४]।

---

१. चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम्। २. श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं शब्दस्य लक्षणम्। ३. निखिलव्यवहारहेतुत्वे सति गुणत्वं बुद्धेर्लक्षणम्। ४. बहिरिन्द्रियाजन्यत्वविशिष्टसंस्कारजन्यत्वविशिष्टज्ञानत्वं स्मृतिलक्षणम्।

अनुभवस्य किं लक्षणम्, के च भेदाः ?

तद्भिन्नं ज्ञानमनुभवः[1]। स द्विविधः–यथार्थोऽयथार्थश्च।

यथार्थानुभवस्य किं लक्षणम् ?

तद्वति तत्प्रकारकोऽनुभवो यथार्थः[2] ( यथा 'रजते इदं रजतमि'ति ज्ञानम् ) सैव प्रमेत्युच्यते।

अयथार्थानुभवस्य किं लक्षणम् ?

तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः[3]। (यथा 'शुक्तौ इदं रजतमि'ति ज्ञानम् ) सैवाऽप्रमेत्युच्यते।

यथार्थानुभवभेदाः के ?

यथार्थानुभवश्चतुर्विधः—प्रत्यक्षानुमित्युपमितिशाब्दभेदात्।

तत्करणं कतिविधम् ?

तत्करणमपि चतुर्विधं–प्रत्यक्षानुमानोपमानशब्दभेदात्।

---

१. स्मृतिभिन्नत्वविशिष्टज्ञानत्वमनुभवलक्षणम्। २. तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालिज्ञानत्वं यथार्थानुभवलक्षणम्। ३. तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वे सति अनुभवत्वम् अयथार्थानुभवलक्षणम्।



करणस्य किं लक्षणम् ?

असाधारणं कारणं करणम्[1]।

कारणस्य किं लक्षणम् ?

कार्यनियतपूर्ववृत्ति कारणम्[2]।

कार्यस्य किं लक्षणम् ?

[3]कार्यं प्रागभावप्रतियोगि।

कारणं कतिविधम् ?

कारणं त्रिविधं–समवाय्यसमवायिनिमित्तभेदात्।

समवायिकारणस्य किं लक्षणम् ?

यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्[4]। यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः।

---

१. व्यापारवत्त्वे सति असाधारणकारणत्वं करणलक्षणम्। कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वम् असाधारणत्वम्। कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वं साधारणकारणत्वम्। २. कार्याव्यवहितप्राक्क्षणावच्छेदेन नियतपूर्वविद्यमानत्वे सति अन्यथासिद्धभिन्नत्वे सति हेतुत्वं कारणस्य लक्षणम्। ३. प्रागभावप्रतियोगित्वं कार्यसामान्यलक्षणम्। ४. समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वं समवायिकारणत्वम्।

**असमवायिकारणस्य किं लक्षणम् ?**

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्[1]। यथा तन्तुसंयोगः पटस्य, तन्तुरूपं पटरूपस्य।

**निमित्तकारणस्य किं लक्षणम् ?**

तदुभयभिन्नं कारणं निमित्तकारणम्[2]। यथा तुरीवेमादिकं पटस्य।

**करणस्य निष्कृष्टलक्षणं किम् ?**

तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।

**प्रत्यक्षप्रमाणलक्षणं किम् ?**

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्[3]।

---

१. समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता या समवायस्वसमवेतत्वान्यतरसम्बन्धावच्छिन्ना कारणता तादृशकारणताश्रयत्वमसमवायिकारणत्वम्। २. समवायिकारणभिन्नत्वे सत्यसमवायिकारणभिन्नत्वे सति हेतुत्वं निमित्तकारणत्वम्। ३. प्रत्यक्षज्ञानाकरणत्वे सति प्रमाणत्वं प्रत्यक्षप्रमाणलक्षणम्।



**प्रत्यक्षप्रमाणलक्षणं किम् ?**

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्[1] (ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्)। तद् द्विविधम्—निर्विकल्पकं सविकल्पकं चेति।

**निर्विकल्पकलक्षणं किम् ?**

(तत्र) निष्प्रकारकं ज्ञानं निर्विकल्पकम्[2]। यथा किञ्चिदिदमिति।

**सविकल्पकलक्षणं किम् ?**

सप्रकारकं ज्ञानं सविकल्पकम्[3]। यथा डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति।

**सन्निकर्षः कतिविधः, कश्च सः ?**

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः—संयोगः,

---

१. प्रत्यक्षज्ञानाकरणत्वे सति ज्ञानत्वं प्रत्यक्षप्रमाणलक्षणम्। इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं वा। २. विशेषणविशेष्यसम्बन्धानवगाहित्वविशिष्टज्ञानत्वं निर्विकल्पकज्ञानलक्षणम्। ३. विशेषणविशेष्यसम्बन्धावगाहित्वविशिष्टज्ञानत्वं सविकल्पकलक्षणम्

संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति ।

घट( द्रव्य )प्रत्यक्षे कः सन्निकर्षः ?

चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः ।

घटरूपप्रत्यक्षे कः सन्निकर्षः ?

घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपस्य समवायात् ।

रूपत्व( गुणगतजाति )प्रत्यक्षे कः सन्निकर्षः ?

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् ।

शब्दप्रत्यक्षे कः सन्निकर्षः ?

श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः, कर्णविवरवर्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् ।

शब्दत्वसाक्षात्कारे कः सन्निकर्षः ?

शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः, श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।



अभावप्रत्यक्षे कः सन्निकर्षः ?

अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः, घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।

प्रत्यक्षप्रमाणस्य निष्कृष्टं लक्षणं किम् ?

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं, तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।

इति प्रत्यक्षपरिच्छेदः ।

अनुमानस्य किं लक्षणम् ?

अनुमितिकरणमनुमानम्[1] ।

अनुमितिः का ?

परामर्शजन्यं ज्ञानमनुमितिः[2] ।

परामर्शस्य किं स्वरूपम् ?

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः[3] । यथा

---

१. अनुमितिनिष्ठकार्यतानिरूपितासाधारणकारणताशालिज्ञानत्वमनुमानस्य लक्षणम् । २. तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वम् । परामर्शजन्यत्वविशिष्टज्ञानत्वमनुमितिसामान्यलक्षणम् । ३. व्याप्तिप्रकारकाभिन्नत्वे सति पक्षसम्बन्धविषयकत्वविशिष्टज्ञानत्वं परामर्शलक्षणम् ।

वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः।

व्याप्तिः का ?

यत्र यत्र धूमस्तत्र तत्राऽग्निरिति साहचर्यनियमो [1]व्याप्तिः।

पक्षधर्मतायाः किं लक्षणम् ?

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता[2]।

अनुमानं कतिविधम् ?

अनुमानं द्विविधं—स्वार्थं परार्थं च।

किं नाम स्वार्थानुमानम् ?

[3]स्वार्थं स्वानुमितिहेतुः, तथाहि—स्वयमेव भूयो दर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः

१. हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिसिद्धान्तलक्षणम्। २. व्याप्यनिष्ठाधेयतानिरूपितपक्षनिष्ठाधिकरणताशालिज्ञानत्वम्पक्षधर्मतालक्षणम्। ३. न्यायाप्रयोज्यत्वे सति स्वार्थानुमितिहेतुत्वं स्वार्थानुमानलक्षणम्।



पर्वते धूमं पश्यन् व्याप्तिं स्मरति—'यत्र यत्र धूमस्तत्र तत्राग्निरि'ति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते, अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते तदेतत् स्वार्थानुमानम्।

परार्थानुमानस्य किं स्वरूपम् ?

यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम्[1]। यथा—पर्वतो वह्निमान् धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान् यथा महानसम्, तथा चायम्, तस्मात्तथेति। अनेन प्रतिपादितााल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते।

पञ्चावयवाः के ?

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः[2]। पर्वतो वह्निमानिति प्रतिज्ञा[3]। धूमवत्त्वादिति हेतुः[4]।

१. प्रतिज्ञादिपञ्चकसमुदायत्वरूपन्यायप्रयोज्यत्वे सत्यनुमानत्वम् परार्थानुमानलक्षणम्। २. प्रतिज्ञाद्यन्यतमत्वमवयवत्वम्। ३. साध्यविशिष्टपक्षबोधकवचनम् प्रतिज्ञा। ४. पञ्चम्यन्तं तृतीयान्तं वा लिङ्गवचनं हेतुः।

यो यो धूमवान् स स वह्निमानित्युदाहरणम्[1]। तथा चायमित्युपनयः[2]। तस्मात्तथेति निगमनम्[3]।

**स्वार्थानुमितिपरार्थानुमित्योः किं करणम् ?**

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्।

**लिङ्गं कतिविधं किञ्चान्वयव्यतिरेकिलक्षणम् ?**

लिङ्गं त्रिविधम्—अन्वयव्यतिरेकि[4]—केवलान्वयि—केवलव्यतिरेकि चेति। अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि, यथा वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः।

---

१. व्याप्तिप्रतिपादकदृष्टान्तवचनमुदाहरणम्। २. उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः। ३. पक्षे साध्यस्याबाधितत्वप्रतिपादकवचनं निगमनम्। ४. व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टत्वे सति साध्याभावप्रतियोगित्वरूपव्याप्तिविशिष्टत्वमन्वयव्यतिरेकिलक्षणम्।



**केवलान्वयिनः किं लक्षणम् ?**

अन्वयमात्रव्याप्तिकं केवलान्वयि[1]। यथा घटोऽभिधेयः प्रमेयत्वात् पटवत्। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।

**केवलव्यतिरेकिणः किं लक्षणम् ?**

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि[2]। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्, यदितरेभ्यो न भिद्यते न तद्गन्धवत्, यथा जलम्। न चेयं तथा। तस्मान्न तथेति। अत्र यद्गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात्।

**पक्षस्य किं लक्षणम् ?**

सन्दिग्धसाध्यवान् पक्षः[3]। यथा धूमवत्त्वे हेतौ पर्वतः।

---

१. व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वं केवलान्वयित्वम्। केवलान्वयिसाध्यकत्वं वा। स्वविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वं वा। २. निश्चितान्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं केवलव्यतिरेकिलक्षणम्। ३. साध्यप्रकारकत्वविशिष्टसंशयविशेष्यत्वम् पक्षत्वम्। अनुमित्युद्देश्यत्वं वा।

सपक्षस्य किं लक्षणम् ?

निश्चितसाध्यवान् सपक्षः[1] । यथा तत्रैव महानसम् ।

विपक्षस्य किं लक्षणम् ?

निश्चितसाध्याभाववान् विपक्षः[2] । यथा तत्रैव महाह्रदः ।

हेत्वाभासाः कतिविधाः ?

सव्यभिचारविरुद्धसत्प्रतिपक्षाऽसिद्धबाधिताः पञ्च हेत्वाभासाः[3] ।

सव्यभिचारस्य किं लक्षणं, कतिविधश्च सः ?

[4]सव्यभिचारोऽनैकान्तिकः । स त्रिविधः—साधारणाऽसाधारणाऽनुपसंहारिभेदात् ।

साधारणस्य किं लक्षणम् ?

तत्र साध्याभाववद्वृत्तिः [5]साधारणोऽनैकान्तिकः ।

---

१. साध्यप्रकारकत्वविशिष्टनिश्चयविशेष्यत्वं सपक्षत्वम् । २. साध्याभावप्रकारकनिश्चयविशेष्यत्वं विपक्षलक्षणम् । ३. यद्विषयकत्वेन ज्ञानस्य अनुमितितत्करणान्यतरविरोधित्वन्तत्त्वं हेत्वाभाससामान्यलक्षणम् । ४. साधारणाद्यन्यतमत्वं सव्यभिचारस्य लक्षणम् । ५. साध्याभावाधिकरणनिरूपिताधेयताशालित्वं साधारणत्वम् ।



यथा पर्वतो वह्निमान् प्रमेयत्वादिति । अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।

असाधारणस्य किं लक्षणम् ?

सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः[1]। यथा शब्दो नित्यः शब्दत्वादिति । अत्र शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति ।

अनुपसंहारिणः किं लक्षणम् ?

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी[2] । यथा सर्वमनित्यं प्रमेयत्वादिति । अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति ।

विरुद्धस्य किं लक्षणम् ?

साध्याभावव्याप्तो हेतुर्विरुद्धः[3]। यथा शब्दो नित्यः

---

१. निश्चितसाध्याधिकरणावृत्तित्वे सति निश्चितसाध्याभावाधिकरणावृत्तित्वे सति पक्षमात्रवृत्तित्वमसाधारणत्वम् । २. अन्वयदृष्टान्तहीनत्वे सति व्यतिरेकदृष्टान्तशून्यत्वम् अनुपसंहारित्वम् । अत्यन्ताभावाप्रतियोगिसाध्यादिकत्वं वा । ३. साध्याभावनिरूपितव्याप्तिविशिष्टत्वे सति हेतुत्वं विरुद्धहेत्वाभासलक्षणम् ।

कृतकत्वाद् घटवदिति । अत्र कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम् ।

सत्प्रतिपक्षस्य किं लक्षणम् ?

साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः[1] । यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत् । शब्दोऽनित्यः कार्यत्वाद्घटवत् ।

असिद्धः कतिविधः ?

[2]असिद्धस्त्रिविधः—आश्रयासिद्धः, स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति ।

आश्रयासिद्धः कः ?

आश्रयासिद्धो[3] यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः स च नास्त्येव ।

---

१. प्रकृतपक्षसम्बन्धिसाध्याभावव्याप्यवत्पक्षत्वं सत्प्रतिपक्षत्वम् । २. आश्रयासिद्ध्याद्यन्यतमत्वम् असिद्धत्वम् । ३. पक्षतावच्छेदकाभाववत्पक्षकत्वम् आश्रयासिद्धत्वम् ।



स्वरूपासिद्धस्य किं रूपम् ?

[1]स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात् । अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् ।

व्याप्यत्वासिद्धः कः, किञ्चोपाधिस्वरूपम् ?

सोपाधिको हेतुर्व्याप्यत्वासिद्धः[2] । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् । यथा पर्वतो धूमवान् वह्निमत्त्वादित्यत्रार्द्रेन्धनसंयोग उपाधिः । तथाहि यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकत्वम् । यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकत्वम् । एवं साध्यव्यापकत्वे सति साधनाव्यापक-

---

१. पक्षनिष्ठहेत्वाभाववत्त्वं स्वरूपासिद्धिलक्षणम् । २. उपाधिविशिष्टत्वे सति हेतुत्वं व्याप्यत्वासिद्धलक्षणम् ।

त्वादार्द्रेन्धनसंयोग उपाधिः[१]। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम्।

बाधितस्य किं लक्षणम् ?

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स [२]बाधितः। यथा वह्निरनुष्णो द्रव्यत्वादिति। अत्रानुष्णत्वं साध्यं, तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम्।

इत्यनुमानपरिच्छेदः।

उपमानलक्षणं किम् ?

उपमितिकरणमुपमानम्[३]। संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम्। तथाहि—कश्चिद्गवयपदार्थमजानन् कुतश्चिदारण्यकपुरुषात् 'गोसदृशो

१. साध्यनिष्ठव्याप्यतानिरूपितव्यापकतावत्त्वे सति हेत्वव्यापकत्वमुपाधेर्लक्षणम्। २. प्रत्यक्षादिप्रमाणान्तरनिर्णीतसाध्यप्रतियोगिकाभाववत्त्वे सति हेतुत्वं बाधितस्य लक्षणम्। ३. उपमितिनिष्ठनिरूपकतानिरूपितनिरूप्यतावत्त्वे सति व्यापारवदसाधारणकारणत्वमुपमानस्य लक्षणम्।



गवयः' इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति, तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते।

इत्युपमानपरिच्छेदः।

शब्दप्रमाणस्य किं स्वरूपम् ?

आप्तवाक्यं शब्दः[१]। आप्तस्तु[२] यथार्थवक्ता। वाक्यं पदसमूहः, यथा गामानयेति। शक्तं पदम्। [३]अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः [४]शक्तिः।

[५]वाक्यार्थज्ञाने हेतवः के ?

आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः। पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्व-

१. आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम्। २. प्रयोगहेतुभूतयथार्थज्ञानवत्त्वमाप्तत्वम्। ३. पदनिष्ठप्रतियोगितानिरूपकत्वविशिष्टार्थनिष्ठानुयोगितानिरूपकसम्बन्धत्वं वृत्तित्वम्। ४. स्वीयतत्पदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन ईश्वरेच्छावत्त्वं शक्तित्वम्। तात्पर्यानुपपत्तिनिष्ठजनकतानिरूपितजन्यतावत्त्वे सति शक्यसम्बन्धत्वं लक्षणात्वम्। तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यसामान्यलक्षणम्। ५. आकाङ्क्षायोग्यतासन्निध्यादिनिष्ठजनकतानिरूपित-जन्यतावत्त्वं वाक्यार्थज्ञानत्वम्।

माकाङ्क्षा[1]। अर्थाबाधो योग्यता[2]। पदानामविलम्बेनोच्चारणं सन्निधिः[3]। तथा च आकाङ्क्षादिरहितं वाक्यमप्रमाणम्। यथा गौरश्वः पुरुषो हस्तीति न प्रमाणम्, आकाङ्क्षाविरहात्। वह्निना सिञ्चतीति न प्रमाणम्, योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादि पदानि न प्रमाणम्, सान्निध्याभावात्।

वाक्यं कतिविधम्?

वाक्यं द्विविधम्—वैदिकं लौकिकञ्च। वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्।

शाब्दज्ञानं किम्?

वाक्यार्थज्ञानं[4] शाब्दज्ञानम्। तत्करणं तु शब्दः।

इति शब्दपरिच्छेदः।

---

१. अव्यवहितोत्तरत्वादिसम्बन्धावच्छिन्नयत्पदनिष्ठयत्पदप्रकारकज्ञानाभावप्रयुक्तो यादृशशाब्दबोधविरहस्तादृशशाब्दबोधे तत्पदनिष्ठतत्पदवत्त्वमाकाङ्क्षालक्षणम्। २. एकपदार्थनिष्ठानुयोगितानिरूपकत्वे सत्यपरपदार्थनिष्ठप्रतियोगिताशालित्वं योग्यतालक्षणम्। बाधाभावो वा। ३. अविलम्बोच्चरितत्वम्पदानां सन्निधिलक्षणम्। ४. वृत्त्या पदजन्यपदार्थस्मृतित्वावच्छिन्नकारणतानिरूपितकार्यताशालित्वं वाक्यार्थज्ञानस्य ( शाब्दबोधस्य ) लक्षणम्।



10819

अयथार्थानुभवस्य कति भेदाः?

अयथार्थानुभवस्त्रिविधः—संशयविपर्ययतर्कभेदात्।

संशयस्य किं लक्षणम्?

एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः[1]। यथा स्थाणुर्वा पुरुषो वेति।

विपर्ययः कः?

मिथ्याज्ञानं विपर्ययः[2]। यथा शुक्तौ 'रजतम्' इति।

तर्कस्य किं स्वरूपम्?

व्याप्यारोपेण व्यापकारोपस्तर्कः[3]। यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति।

---

१. एकधर्मावच्छिन्नविशेष्यतानिरूपितभावाभावप्रकारकज्ञानत्वं संशयलक्षणम्। २. तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वे सति तर्कभिन्ननिश्चयत्वं विपर्ययस्य लक्षणम्। ३. व्याप्यविषयकाहार्यज्ञाननिष्ठजनकतानिरूपितजन्यताशालिव्यापकविषयकाहार्यज्ञानत्वं तर्कस्य लक्षणम्।

**स्मृतिः कतिविधा ?**

स्मृतिरपि द्विविधा—यथार्था अयथार्था च। प्रमाजन्या यथार्था, अप्रमाजन्या अयथार्था।

**सुखस्य किं लक्षणम् ?**

सर्वेषामनुकूलवेदनीयं सुखम्[१]।

**दुःखस्य किं लक्षणम् ?**

प्रतिकूलवेदनीयं दुःखम्[२]।

**इच्छाद्वेषप्रयत्नानां कानि लक्षणानि ?**

इच्छा[३] कामः। क्रोधो द्वेषः[४]। कृतिः प्रयत्नः[५]।

**धर्मस्य अधर्मस्य च किं लक्षणम् ?**

विहितकर्मजन्यो धर्मः[६]। निषिद्धकर्मजन्यस्त्वधर्मः[७]।

---

१. इष्टसाधनताज्ञानानधीनेच्छाविषयत्वं सुखस्य लक्षणम्। २. इतरद्वेषानधीनद्वेषविषयताशालित्वं दुःखस्य लक्षणम्। ३. प्रवृत्तिसाक्षादनुकूलत्वमिच्छाया लक्षणम्। ४. निवृत्तेः साक्षादनुकूलताशालित्वं द्वेषस्य लक्षणम्। ५. कृतित्वजातिमत्त्वं प्रयत्नस्य लक्षणम्। ६. वेदादिनिष्ठप्रतिपादकतानिरूपितप्रतिपाद्यतावत्कर्मजन्यत्वं धर्मस्य लक्षणम्। ७. वेदादिनिष्ठनिषेधकतानिरूपितनिषेध्यतावत्कर्मजन्यत्वमधर्मस्य लक्षणम्।



**आत्ममात्रविशेषगुणाः के ?**

बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या ईश्वरस्य, अनित्या जीवस्य।

**संस्कारः कतिविधः, तद्भेदाश्च किंस्वरूपाः ?**

[१]संस्कारस्त्रिविधः—वेगो[२] भावना[३] स्थितिस्थापकश्चेति[४]। वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः। अनुभवजन्या स्मृतिहेतुर्भावना, आत्ममात्रवृत्तिः। अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः, कटादिपृथिवीवृत्तिः। इति गुणाः॥

---

१. आत्मविशेषगुणवृत्तिमूर्त्तवृत्तिगुणत्वनिष्ठव्यापकतानिरूपितव्याप्यतावज्जातिमत्त्वं संस्कारस्य लक्षणम्। २. क्रियानिष्ठजन्यतानिरूपितजनकतावत्त्वे सति क्रियानिष्ठजनकतानिरूपितजन्यताशालित्वं वेगस्य लक्षणम्। ३. अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनाया लक्षणम्। ४. अन्यथाकृतस्य पुनस्तदवस्थापादकत्वं स्थितिस्थापकलक्षणम्।

# अथ कर्मादिलक्षणप्रकरणम्

**कर्मणः किं लक्षणम् ?**

चलनात्मकं कर्म[1]। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।

**सामान्यस्य किं लक्षणम् ?**

नित्यमेकमनेकानुगतं सामान्यम्[2]। द्रव्यगुणकर्मवृत्ति। तद् द्विविधम्—परापरभेदात्। परं सत्ता, अपरं द्रव्यत्वादि।

१. संयोगभिन्नत्वे सति संयोगासमवायिकारणत्वं कर्मलक्षणम्।
२. नित्यत्वे सति अनेकसमवेतत्वं सामान्यस्य (जातेः) लक्षणम्।



**विशेषाणां किं लक्षणम् ?**

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः[1]।

**समवायस्य किं लक्षणम् ?**

नित्यसम्बन्धः समवायः[2]। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति।

**प्रागभावस्य किं लक्षणम् ?**

अनादिः सान्तः प्रागभावः[3], उत्पत्तेः पूर्वं कार्यस्य।

**प्रध्वंसाभावस्य किं लक्षणम् ?**

सादिरनन्तः प्रध्वंसः[4], उत्पत्त्यनन्तरं कार्यस्य।

१. नित्यद्रव्यवृत्तित्वविशिष्टत्वे सति स्वतो व्यावर्त्तकत्वं विशेषलक्षणम्। २. नित्यत्वे सति विशिष्टबुद्धिनियामकत्वे सति सम्बन्धप्रतियोग्यनुयोगिभिन्नत्वं समवायस्य लक्षणम्। ३. उत्पत्तिरहितत्वे सति ध्वंसप्रतियोगित्वम्प्रागभावस्य लक्षणम्। ४. उत्पत्तिविशिष्टत्वे सति विनाशप्रतियोगित्वं ध्वंसलक्षणम्।

**अत्यन्ताभावस्य किं लक्षणम् ?**

त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः[१] । यथा भूतले घटो नास्तीति ।

**अन्योन्याभावस्य किं लक्षणम् ?**

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः[२] । यथा घटः पटो नेति ।

**पदार्थानुपसंहरति**

सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम् ।

काणाद[३]न्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नम्भट्टेन विदुषा रचितस्तर्कसङ्ग्रहः ॥

इति श्रीमहामहोपाध्यायान्नम्भट्टविरचितस्तर्कसंग्रहः समाप्तः ॥

१. प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वे सति अन्योन्याभावभिन्नत्वे सति अभावत्वम् अत्यन्ताभावलक्षणम् । २. तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं भेदस्य (अन्योन्याभावस्य) लक्षणम् । ३. काणादेति–कणादस्येदं काणादं कणादाभिमतम्, न्याय-



मतं गौतममुनिमतम् । काणादन्याये च ते मते चेति द्वन्द्वगर्भकर्मधारयः । कर्मधारयसमासेन समस्यमानपदार्थयोरभेदसंसर्गलाभः । मतयोरित्यत्र षष्ठ्या विषयतानिरूपकत्वमर्थः । बालानां व्युत्पत्तिरित्यत्र षष्ठ्यास्समवेतत्वमर्थः, सिद्धये इत्यत्र चतुर्थ्याः प्रयोजकत्वमर्थः । समानविभक्तिकनामार्थयोरभेदसम्बन्धेन अन्वय इति नियमः । विदुषेत्यत्र तृतीयायास्समवेतत्वम् , रचयतेः कृतिरर्थः, क्तप्रत्ययस्य भूतकालिकत्वं विषयतावांश्चार्थः । भूतकालिकत्वस्य कृतौ, विषयतावतस्तर्कसंग्रहेऽन्वयः । एवञ्च काणादन्यायाऽभिन्नमतद्वयविषयकबालसमवेतव्युत्पत्तिसिद्धिप्रयोजकान्नम्भट्टाभिन्नविद्वत्समवेतभूतकालिककृतिविषयाऽभिन्नस्तर्कसंग्रहाख्यो ग्रन्थ इति ।

लक्षणानां गतिस्तावच्छास्त्रसिद्धा निरूपिता ।
आशासे सज्जनानां स्याद्धृदि सन्तोषकारिणी ॥ १ ॥
गुरोः श्रीतर्कतीर्थस्य न्यायाचार्याभिधस्य वै ।
राधाकान्तस्य सुधियः पदद्वन्द्वं समाश्रये ॥ २ ॥

इति जौनपुरमण्डलान्तर्गतबदलापुरउदयपुरगेलह्वाभिजनकौमुदीकल्पलतिकापरिष्कारदर्पणाद्यनेकग्रन्थकृद्धटिकाशतकशतावधानाशुकविवैयाकरणशिरोमणिशुक्लश्रीवेणीमाधवशास्त्रिणामात्मजेन श्रीराजनारायणशुक्लशास्त्रिविरचिता लक्षणटिप्पणी समाप्ता ।